# श्रीमद्भगवद्गीतायाः आ तृतीयाध्यायात् षष्ठाध्यायं यावत् भारतभावदीपव्याख्यानदिशा विमर्शात्मकमध्ययनम्

*(śrīmadbhagavadgītāyāḥ ā tṛtīyādhyāyāt ṣaṣṭhādhyāyaṃ yāvat bhāratabhāvadīpavyākhyānadiśā vimarśātmakamadhyayanam)*

## *(A Critical Study of the Śrīmadbhagavadgītā's Third Chapter to Six Chapter Based on Bhāratabhāvadīpa Commentary)*

रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य संस्कृतदर्शनविभागे पि.एच्.डि (Ph.D) इत्युपाधिप्राप्तये समर्प्यमाणः शोधप्रबन्धः


मार्गनिर्देशकः

**डॉ. शन्तनु-अयाचितः**

सहायकाध्यापकः, संस्कृतदर्शनविभागः

अनुसन्धाता

**तीर्थङ्कर-देः**

अनुक्रमाङ्कः (ID) – B2150006

शोधच्छात्रः, संस्कृतदर्शनविभागः



रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्

(मानितविश्वविद्यालयः)

बेलुडमठः, हाओडा, पश्चिमवङ्गः, ७११२०२

**२०२५**

**श्रीमद्भगवद्गीतायाः आ तृतीयाध्यायात् षष्ठाध्यायं यावत् भारतभावदीपव्याख्यानदिशा विमर्शात्मकमध्ययनम्।**

**तीर्थङ्कर दे**

**संस्कृतदर्शनविभागः, रामकृष्णमिशन्विवेकानन्दशैक्षणिकशोधसंस्थानम्**

**बेलुडमठः, पश्चिमबङ्गराज्यम्, हाओडा- ७११२०२**

## भूमिका

दर्शनेषु अन्यतमः अद्वैतवेदान्तः। न द्वैतम् अद्वैतम्। ज्ञानस्य चरमस्थितिरेव अद्वैतमित्युच्यते। अस्य अद्वैतदर्शनस्य प्रवर्तकः जगद्गुरुः शङ्कराचार्यः। अतः अस्य दर्शनस्य "शाङ्करदर्शनम्" इत्यपि प्रसिद्धिः अस्ति। अद्वैतदर्शनं शङ्कराचार्यः प्रस्थानत्रयेण समर्थितवान् अस्ति। अतिप्रसिद्धं श्रुतिप्रस्थानं, स्मृतिप्रस्थानं, न्यायप्रस्थानमिति प्रस्थानत्रयम्। श्रीमद्भगवद्गीता स्मृतिप्रस्थानेऽन्तर्भवति। श्रीमद्भगवद्गीतायां अष्टादशसु अध्यायेषु अन्यतमाः तृतीयाध्यायः चतुर्थाध्यायः पञ्चमाध्यायः षष्ठाध्यायश्चेति। श्रीमद्भगवद्गीतायाः तृतीयाध्यायस्य नाम कर्मयोगाध्यायः। चतुर्थाध्यायस्य नाम ज्ञानयोगाध्यायः। पञ्चमाध्यायस्य नाम कर्मसन्न्यासयोगाध्यायः। षष्ठाध्यायस्य नाम आत्मसंयमयोगाध्यायः। आ तृतीयाध्यायात् षष्ठाध्यायं यावत् भारतभावदीपव्याख्यानदिशा विमर्शात्मकमध्ययनम् इति इमं विषयं समाश्रित्य एव प्रकृतः अयं शोधग्रन्थः प्रणीतः।

## प्रकृतशोधपरिधिः

महाभारतम् महर्षिवेदव्यासेन विरचितम्। समाजेऽस्मिन् इदमैतिहासिकग्रन्थत्वेन बहुप्रसिद्धं विद्यते। अस्मिन् ग्रन्थे कौरवपाण्डवानां महायुद्धं मुख्यविषयरूपेण उपवर्णितमस्ति। मानवजीवनस्य धर्म-अर्थ-काम-मोक्ष-रूपाः समस्तपुरुषार्थाः अस्मिन् सुविशालग्रन्थे सन्निविष्टाः सन्ति। अस्य महाभारतस्य भीष्मपर्वणि श्रीमद्भगवद्गीता विद्यते। भगवता श्रीकृष्णेन मोहग्रस्तम् अर्जुनं प्रति ज्ञान-कर्म-भक्ति-विषयकः उपदेशः श्रीमद्भगवद्गीतायां प्रदत्तः। इयं विश्वजनीनकृतिः कालजयिनी चिरन्तनी एव। अस्य महाभारतस्य अष्टादश पर्वाणि सन्ति। तस्मिंश्च महाभारते आदि-सभा-वन-विराट्-उद्योग-भीष्म-द्रोण-

कर्ण-शल्य-सौप्तिक-स्त्री-शान्ति-अनुशासन-अश्वमेध-आश्रमवासि-महाप्रास्थानिक–स्वर्गारोहणपर्वाणि सन्ति । महाभारतस्य अष्टादशसु पर्वसु अन्यतमं भीष्मपर्व। तस्मिन् भीष्मपर्वण्येव श्रीमद्भगवद्गीता विराजते। अद्वैतवेदान्ते अतिप्रसिद्धं प्रस्थानत्रयम्। श्रुतिप्रस्थानं स्मृतिप्रस्थानं न्यायप्रस्थानमिति प्रस्थानत्रयनाम्ना अभिहितम्। श्रीमद्भगवद्गीता स्मृतिप्रस्थाने अन्तर्भवति। श्रीमद्भगवद्गीता अष्टदशसु अध्यायेषु विभक्ता वर्तते। कर्मणः कालस्य चाव्यवहितसम्बन्धम् अवलोक्य कालानुगुण्येन कर्मणः परिधिः निश्चीयते। तत्र मया पि.एच्.डि इति शोधोपाधिनिमित्तं भारतभावदीपव्याख्यानदिशा श्रीमद्भगवद्गीतायाः आ तृतीयाध्यायात् षष्ठाध्यायं यावत् केवलं विमर्शः क्रियते। तत्रैव च तदानुषङ्गीकाश्च विषयाः आलोच्यन्ते। प्रकृतेऽस्मिन् शोधकार्ये श्रीमद्भगवद्गीतायाः चिततृतीयाद्यध्यायैः सह व्यतिरिक्तानाम् अध्यायानामपि ग्रहणे तत् कार्यं सुविशालं भविष्यति। ग्रन्थविस्तारभयात् पि.एच्.डि इति शोधोपाध्यर्थं अहं केवलं श्रीमद्भगवद्गीतायाः आतृतीयाध्यायात् षष्ठाध्यायं यावत् चितवान्। तस्मात् भारतभावदीपदिशा श्रीमद्भगवद्गीतायाः तृतीयोऽध्यायः चतुर्थोऽध्यायः पञ्चमोऽध्यायः षष्ठोऽध्यायश्च एव अस्य ग्रन्थस्य शोधपरिधिरिति वक्तुं शक्यते।

**प्रकृतशोधप्रणयनोद्देश्यम्**

सर्वैः विज्ञातमेव समग्रस्यापि उपनिषद्राशेः सारभूतं यत् गीताशास्त्रं सर्वप्राणिनां सर्वविधदुःखप्रहणेन परमपुरुषार्थप्राप्तये भगवतो विष्णोः कृष्णात्मना धरणीमवतीर्णस्य मुखारविन्दात् निस्सृतमिति। गीताशास्त्रस्य अस्य विविधेषु व्याख्यानेषु भाष्यादिषु च उपलब्धेषु नीलकण्ठव्याख्यारूपं भारतभावदीपाख्यम् व्याख्यानम् अत्युत्कृष्टं न हि अत्र विशयः। विशेषतस्तु शङ्करादीन् साम्प्रदायिकव्याख्यानपरान् सद्गुरून् नमस्कृत्य तेषां सिद्धान्तान् अनुसृत्य सन् नीलकण्ठाचार्यः स्वव्याख्यानकौशलेन अन्यान् अतिशेते इति वचनं न अयुक्तम्। तत्र इदमेव कारणं अवलोकयामः यत् नीलकण्ठाचार्येतराः भाष्यकारादयः तत्त्वव्याख्यानमात्रपराः एव दृश्यन्ते। समग्रस्यैव महाभारतस्य व्याख्यात्रा नीलकण्ठाचार्येण विहितं यद्व्याख्यानं तत्तत्त्वनिरूपणेन सह भारतस्थपात्राणां मनांस्यपि विवर्ण्यन्ते। महाभारतान्तर्गतानां तत्तत्पात्राणां भावविश्वम् आविष्करोतीति। तथाहि नीलकण्ठाचार्यैः निगद्यते-

भारते सर्ववेदार्थो भारतार्थश्च कृत्स्नशः।

गीतायामस्ति तेनेयं सर्वशास्त्रमयी मता ॥

इति नीलकण्ठाचार्यवचनमपि प्रामाण्यं भजते। वेदस्य शास्त्रस्य वा कर्मोपास्तिज्ञानभेदेन भेदः दृश्यते। नीलकण्ठाचार्येण काण्डत्रयात्मकत्वमिति विनिर्धार्य प्रोक्तं तच्च गीताशास्त्रे अध्यायषट्कं त्रिसंख्याकं क्रमेणैव कर्मोपास्तिज्ञानभेदेन कर्मोपास्तिज्ञाननिरूपकतां भजते इति च प्रतिपादितम्। नीलकण्ठाचार्येण सविकल्पकब्रह्मणः शुद्धब्रह्मता च ग्रन्थकृता साक्षादेव निरस्ता। तस्मादेव नीलकण्ठाचार्यस्य भाष्यस्य शैलीनिरूपणवैलक्षण्यं वीक्ष्य तदीयभारतभावदीपव्याख्यानविमर्शे प्रवृत्तोऽस्मि।

**प्रकृतशोधसमस्या**

सनातनवैदिकपरम्परायाः सर्वैरेव व्याख्याकारैः भाष्यकारैः टीकाकारैश्च स्वकीयगुणविशेषैः सम्यगतया श्रीमद्भगवद्गीता प्रतिष्ठिता। सा हि वेदान्तप्रस्थानत्रय्यां परिगणिता अस्ति। स्वस्वसम्प्रदायसिद्धान्तानुसारेण व्याख्यातृभिश्च श्रीमद्भगवद्गीता व्याख्याता। सर्वप्रथमं प्राचीनम् अतिप्रसिद्धं भाष्यं श्रीमच्छङ्करभगवत्पादाचार्यप्रणीतम्। अद्वैततत्त्वपरकतया भाष्यं श्रीशङ्करभगवत्पादानाम्। अद्वैतमतेनैताः व्याख्याः सर्वा एव श्रीमद्भगवद्गीतायाः आनुगुण्यं तथा नैव वहन्ति यथाऽन्ये वैष्णवसम्प्रदायाचार्या इति विदुषां विनिर्णयः। मधुसूदनाचार्यास्तु अद्वैतानुसारं व्याख्यानं कुर्वाणाः अपि भगवद्धर्मानुसारिणीं व्याख्यां प्रस्तुवन्ति। अद्वैतसिद्धान्तखण्डनपराः व्याख्याः वैष्णवाचार्याणां दरीदृश्यन्ते। तत्र प्रमुखाः रामानुजाचार्याः, विशिष्टाद्वैतवेदान्तसम्प्रदायप्रतिष्ठापकाः स्वसिद्धान्तानुसारं भागवतधर्ममेव गीतोक्तं याथातथ्येन व्याख्याव्याजेन स्थापयाम्बभूवुः। द्वैतवेदान्तानुसारिणी व्याख्या मध्वाचार्याणां सम्प्राप्यते। शुद्धाद्वैतवेदान्तसम्प्रदायप्रतिष्ठाता बल्लभाचार्यः। तदीयस्य अणुभाष्यस्य व्याख्यां शुद्धाद्वैतपरकतया उपलभामहे। इत्थं सर्वेऽपि वेदान्तदार्शनिकाः एकैकस्य मतस्य प्रचारकाः प्रसारकाश्च वर्तन्ते। तेषां दार्शिनिकानां मतभेदेऽपि तैः आचार्यैः तत्त्वं तु एकमेव प्रतिपादितम्। एवं सम्पूर्णमहाभारतटीकाकर्तुः नीलकण्ठस्य भारतभावदीपाख्यटीकाऽपि महदुपकारिणी वर्तते। अतः प्रकृतेऽस्मिन् शोधकार्ये अयं विशयः समुद्भूतः किं नीलकण्ठाचार्यः अद्वैततत्त्वेतरवादी आहोस्वित् अद्वैतवादी इति इयमेव शोधसमस्या।

**प्रकृतशोधपद्धतिः**

प्रकृतेऽस्मिन् शोधग्रन्थे मया विमर्शात्मिका पद्धतिः समाश्रिता। तत्र प्रथमं शोधग्रन्थः अध्यायचतुष्टयेन विभाजितः। ततः भारतभावदीपग्रन्थानुसन्धानेन कर्मज्ञानकर्मसन्न्यासात्मसंयमयोगाध्यायानां स्वरूपमवबुद्ध्य श्रीमद्भगवगवद्गीतायाः तृतीयचतुर्थपञ्चमषष्ठाध्यायाः मया विमृश्यन्ते। ततः प्रकृतशोधविषयाधारेण नीलकण्ठेतराचार्याणामपि मतसादृश्यानि वैसादृश्यानि दृष्टान्तवैलक्षण्यानि च पर्यालोच्य विविधटीकाभाष्योक्तवचनानि समुद्धृतानि। अन्ते च पादटिप्पणीं परिशिष्टञ्चापि प्रकृतशोधविषयस्य सुबोधाय प्रादर्शयम्।

**अध्यायानां परिचयः**

प्रकृतः शोधग्रन्थोऽयं चतुर्षु अध्यायेषु विभक्तः। शोधप्रबन्धस्य प्रथमाध्याये कर्मयोगः प्रतिपादितः। तत्र केचन विशिष्टाः बिन्दवः पर्यालोचिताः सन्ति। ते भवन्ति -ज्ञाननिष्ठाप्रशस्ततताशङ्का, मोहयसीव इति शब्दार्थवर्णनम्, एकस्याः निष्ठायाः द्विप्रकरतानिरूपणमधिकारिभेदप्रदर्शनञ्च, विद्वद्विविदिषा संन्न्यासयोर्भेदः, कर्मप्रवृत्तिबीजभूताः गुणाः, मिथ्याचारनिरूपणम्, संयमितेन्द्रियस्य विशेषता, आश्रमव्यवस्थाविचारः, कर्मणा वद्ध्यते जन्तुः इति स्मृतिसमन्वयश्च इति।

शोधप्रबन्धस्य द्वितीयाध्याये  ज्ञानयोगः सविस्तरं निरूपितः। द्वितीयाध्याये विमृष्टाः केचन विशिष्टाः बिन्दवः सन्ति। ते निगद्यन्ते- ईश्वरत्वसर्वज्ञत्वयोः प्रदर्शनप्रयोजनं, सप्तर्षिपरिचयः, अजोऽपि सन्नव्ययात्मा इति श्लोकार्थचिन्तनं, भगवज्जन्मकर्मणोः मुमुक्षुज्ञेयत्वनिरूपणं, जारिणीदृष्टान्तेन भगवच्छरणागतिवर्णनं, बिम्बप्रतिबिम्बदृष्टान्तेन वैषम्यनैर्घृण्यारोपनिवारणम्, इति मां योऽभिजानाति इत्यस्य शाङ्करनीलकण्ठयोः मतवैलक्षण्यं, विद्वत्कर्मप्रयोजनप्रदर्शनं, विदुषः क्रियमाणकर्मफलराहित्यं, निराशीर्यतचित्तात्मेति श्लोकार्थचिन्तनं, सपरिग्रहस्य अग्निहोत्राद्यनुष्ठायित्वनिरूपणं, ज्ञानेन कर्मणां निरन्वयोच्छेदनिरूपणं, विद्वत्कर्मप्रविलयहेतुकथनं, सम्यग्दर्शनस्य यज्ञत्वसम्पादनं, सम्यग्दर्शनस्य स्तुत्यर्थं पञ्च यज्ञान्तराणामुपक्षेपः, यज्ञपञ्चकनिरूपणम्, पञ्चमहायज्ञावशेषभक्षणफलनिरूपणमयज्ञनिन्दा च इति।

शोधप्रबन्धस्य तृतीयाध्याये कर्मसन्न्यासयोगः उपस्थापितः। तत्र इमे विषयाः पर्यालोच्यन्ते- सन्न्यासकर्मयोगयोः युगपत् एकपुरुषानुष्ठेयत्वासम्भवः, कर्मयोगस्य वैराग्यहेतुत्वनिरूपणं, कर्मयोगो विशिष्यते इति विशेष्यतानिरूपणं, सांख्ययोगयोः फलतः साम्यनिरूपणं, योगशब्दविवेचनं,

सर्वभूतात्मभूतात्मेति पदार्थचिन्तनं, तत्त्वविदः कर्तृत्वाभावात् निर्लेपतानिरूपणम्, अयुक्तस्य कर्मबन्धः, नैव कुर्वन् न कारयन् इति वाक्यस्य राजदृष्टान्तेन विवेचनं, स्वभावस्तु प्रवर्तते इति वाक्यार्थविचारः, भगवतः कारयितृत्ववादिन्याः श्रुतेः सङ्गमनप्रदर्शनं, ज्ञानस्य एष्टव्यत्वं तत्प्राप्त्युपायश्च, पण्डितदृष्टिनिरूपणं, स्पर्शजभोगानां दुःखयोनित्वनिरूपणं, योगिस्वरूपञ्चेति।

शोधप्रबन्धस्य चतुर्थाध्याये आत्मसंयमयोगः निरूपितः। तत्र विमृष्टाः विषयाः वर्तन्ते ध्यानयोगहेतुः कर्मयोगः, संन्यासिनः योगिनश्च साम्यचिन्तनं, कर्मानुष्ठानावधिविचारः, योगः निर्बीजसमाधिः, आत्मनः उद्धारहेतुः आत्मैवेति निरूपणं, मनसः शत्रुत्वनिरूपणं, मनोजयफलं, समाधिसिद्धिफलं, समत्वबुद्धिविशेषः, योगाभ्यासप्रक्रिया, योगाभ्यासफलं, योगाभ्यासनियमाः, निर्वाणपरमाशान्तिलाभोक्तलक्षणानि, शमादिसाधनविधानञ्चेति।

**उपसंहारः**

शोधप्रबन्धस्य प्रथमद्वितीयतृतीयचतुर्थाध्यायानां सारः उपसंहारे सङ्गृहीतो वर्तते।

**परिशिष्टम्**

शोधप्रबन्धस्य अन्तिमे मया परिशिष्टं स्थापितम्। तत्परिशिष्टं पञ्चधा विभक्तम् अस्ति। प्रथमे परिशिष्टे उद्धृतश्लोकानां सूची स्थापिता। द्वितीये परिशिष्टे उद्धृतश्रुतीनां सूची स्थापिता। तृतीये परिशिष्टे उद्धृतसूत्राणां सूची सङ्कलिता। चतुर्थे परिशिष्टे शास्त्रभाष्यवाक्यानामुद्धरणसूची प्रदत्ता। पञ्चमे परिशिष्टे अवलोकितग्रन्थसूची मया स्थापिता वर्तते।